# Dashavatara Prarthana

# દશાવતારપ્રાર્થના

## Document Information

Text title : Dashavatara Prarthana

File name : dashAvatAraprArthanA.itx

Category : vishhnu, dashAvatAra

Location : doc_vishhnu

Author : raNganAthasUri

Proofread by : Rajesh Thyagarajan

Description/comments : From Stotrasamuchchaya 2, Edited by Pandit K. Parameshwara Aithal

Latest update : May 10, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 11, 2023

*sanskritdocuments.org*

# દશાવતારપ્રાર્થના

મત્સ્યરૂપિણો ભગવતઃ પ્રાર્થના-
ત્રય્યા દુર્જયદાનવેન્દ્રહૃતયા વૈયાકુલીં પ્રાપિતે
    નાલીકાસનમાનસે સરસિજે ભાનોરપાયેન વા ।
મધ્યેઽમ્ભોનિધિ યઃ પ્રહૃત્ય તમરિં વાણીં પુરાણીં પુનઃ
    પ્રાદાત્ તસ્ય યથાપુરં સ તનુતાં શ્રીમત્સ્યમૂર્તિઃ શ્રિયમ્ ॥ ૧॥

કૂર્મરૂપિણો ભગવતઃ પ્રાર્થના-
યચ્છ્વાસાનિલપર્યુદસ્તજલધિક્ષોઠોચ્ચલદ્વીચિકા-
    વેધઃસૌધવિઘટ્ટનોદ્ભટરવો બ્રહ્માણ્ડમાસ્ફોટયન્ ।
દૈત્યાન્ મોહયતો હરેર્દ્વિવિષદાં પીયૂષદાનક્ષણે
    સાહાય્યં વિતતાન શર્મ કુહનામૂર્તિઃ સ નિર્માતુ નઃ ॥ ૨॥

વરાહરૂપિણો ભગવતઃ પ્રાર્થના-
દંષ્ટ્રાગ્રે પૃથુસીમ્નિ યસ્ય જલધેરુન્મગ્નમૂર્તેઃ પુરા
    ઘોણે ઘુર્ઘુરઘૂર્ણમાનતનુતામાસેદુષી મેદિની ।
પ્રીતા શૈલશિખાધિરોહજનિતામાધત્ત દિવ્યાં શ્રિયં
    માયાસૂકરશેખરઃ સ દિશતામામોદભૂમોદયમ્ ॥ ૩॥

નરસિંહરૂપિણો ભગવતઃ પ્રાર્થના-
દંષ્ટ્રાંશૂચ્ચયપાણ્ડરૈર્નખમુખૈર્દૈત્યેન્દ્રવક્ષઃસ્થલી-
    નિષ્ઠ્યૂતામિતકુઙ્કુમાભરુધિરપ્રાગ્ભારસમ્ભાવિતૈઃ ।
માલિન્યં ઘુસદાં મમાર્જ હૃદયે પ્રહ્લાદમાહ્લાદયન્
    યઃ પૂર્વં તમિમં ભજેમ શરણં વૈકુણ્ઠકણ્ઠીરવમ્ ॥ ૪॥

વામનરૂપિણો ભગવતઃ પ્રાર્થના-
આસીદ્ યસ્ય વિતાનમમ્બરસરિત્ પૂર્વં પરસ્તાદસૌ
    શીર્ષત્રાણમભૂદથો ગલતલે મન્દારમાલાભવત્ ।
જાતા ધૌતમથાંશુકં કટિતટે પાદારવિન્દે તતઃ

સમ્પેદે મધુબિન્દુરીતિમવતાત્ યાચ્ઞાવટુસ્તદ્વદુઃ ॥ ૫॥

પરશુરામરૂપિણો ભગવતઃ પ્રાર્થના-
દૃપ્તક્ષત્રવધાધ્વરે પિતૃવધામર્ષોદયાદ્ દીક્ષિતો
બાહા હેહયનાયકસ્ય સમિધઃ સાહસ્રમપ્યુજ્જ્વલાઃ ।
ધારાગ્રજ્વલદાશુશુક્ષણિશિખામધ્યે કુઠારસ્ય યો
નિસ્તન્દ્રં જુહુવામ્બભૂવ મુનિરાડવ્યાદભવ્યાત્ સ નઃ ॥ ૬॥

શ્રીરામભદ્રરૂપિણો ભગવતઃ પ્રાર્થના-
વીરઃ કોઽપિ સકૃન્નતાર્તિહરણશ્રદ્ધાવિશુદ્ધાશયઃ
કામં કામપિ સમ્પદં વિતનુતામાકલ્પમલ્પેતરામ્ ।
યસ્યાપાઙ્ગજશોણિમા સ્તનતટે સેહે ન મુક્તાશ્રિયં
નેત્રે કજ્જલકાલિમાનમપિ ચ ક્રવ્યાદવામભ્રુવામ્ ॥ ૭॥

બલભદ્રરૂપિણો ભગવતઃ પ્રાર્થના-
યસ્યાહુર્મુસલં હલં પ્રહરણં સઙ્ગ્રામસીમાજુષો
ભેત્તું વૈરિશિરોધનાન્ નમયિતું ચાન્યાનપેક્ષં બુધાઃ ।
યેનાકાર્ષિ ચ હસ્તિનં કુરુમદજ્વાલારુજં જાહ્નવી-
પૂરે ત્યાજયિતું સ લાઙ્ગલધરઃ કુર્વીત ગુર્વીં શ્રિયમ્ ॥ ૮॥

શ્રીકૃષ્ણરૂપિણો ભગવતઃ પ્રાર્થના-
અન્વિષ્ટોઽપિ ચિરાદકૃત્રિમગિરાં શ્રેણીભિરેણીદૃશાં
ગોપાલાહ્વયજન્મનાં તુ સુલભં સ્વાત્માનમાધત્ત યઃ ।
યો વિશ્વસ્ય નિયન્તૃતામનુભવન્નપ્યાવહદ્ દૂતતાં
બદ્ધીમોઽઞ્જલિમાદરેણ કરુણાદિગ્ધાય મુગ્ધાત્મને ॥ ૯॥

કલ્કિરૂપિણો ભગવતઃ પ્રાર્થના-
રાજન્યાપશદૈર્જગદ્વિપદલઙ્કર્મીણચર્યાપદૈ-
ર્નિર્મૂલે નિખિલે કલેરુપચયાદ્ ધર્મે મહીમણ્ડલે ।
પ્રાદુર્ભૂય કૃપાણપાણિરથ તાન્ નિર્ધૂય ભૂયઃ પુરા
ધર્મં કાર્તયુગં પ્રવર્તયતિ યઃ કલ્કી શ્રિયૈ કલ્પતામ્ ॥ ૧૦॥

ઇતિ કૌશિકરઙ્ગનાથસૂરિઃ સુકુમારૈઃ પદગુમ્ભનૈઃ સ્તુવન્ સન્ ।
પરમં પુરુષં દશાવતારમ્ । -।- ।- । શોભતે કૃતાર્થઃ ॥

ઇતિ રઙ્ગનાથસૂરિવિરચિતા શ્રીદશાવતાર પ્રાર્થના સમાપ્તા ।
સ્તોત્રસમુચ્ચયઃ ૨ (૬૧)

Proofread by Rajesh Thyagarajan

*Dashavatara Prarthana*

pdf was typeset on May 11, 2023

Please send corrections to *sanskrit@cheerful.com*